—— क्नथयमानः, क्नथयिष्यमाणः, चाक्नथ्यमानः, चाक्नथिष्यमाणः;

क्नथ्-क्नत्-क्नथौ-क्नथः; — — —

क्नथितम्-तः, क्नथितः, चिक्नथिषितः, चाक्नथितः-तवान्;

क्नथः, क्नथः, चिक्नथिषुः, चाक्नथः;

क्नथितव्यम्, क्नथयितव्यम्, चिक्नथिषितव्यम्, चाक्नथितव्यम्;

क्नथनीयम्, क्नथनीयम्, चिक्नथिषणीयम्, चाक्नथनीयम्;

[1]क्नाथ्यम्, क्नथ्यम्, चिक्नथिष्यम्, चाक्नथ्यम्;

ईषत्क्नथः-दुष्क्नथः-सुक्नथः; — —

क्नथ्यमानः, क्नथ्यमानः, चिक्नथिष्यमाणः, चाक्नथ्यमानः;

क्नाथः, क्नथः, चिक्नथिषः, चाक्नथः,

क्नथितुम्, क्नथयितुम्, चिक्नथिषितुम्, चाक्नथितुम्;

[2]क्नतिः, क्नथना, चिक्नथिषा, चाक्नथा;

क्नथनम्, क्नथनम्, चिक्नथिषणम्, चाक्नथनम्;

क्नथित्वा, क्नथयित्वा, चिक्नथिषित्वा, चाक्नथित्वा;

विक्नथ्य, [3]विक्नथय्य, प्रचिक्नथिष्य, प्रचाक्नथ्य;

क्नाथम् २ क्नथित्वा २ } [4]क्नाथम् २-क्नथम् २ क्नथयित्वा २ } चिक्नथिषम् २ चिक्नथिषित्वा २ } चाक्नथम् २; चाक्नथित्वा २. }

## (265) "क्नसु ह्वरणदीप्त्योः" (IV-दिवादिः-1113. अक. सेट्. पर.)

### ह्वरणम्=कौटिल्यम्।

क्नासकः-सिका, [5]क्नसकः-सिका, चिक्नसिषकः-षिका, चाक्नसकः-सिका;

क्नसिता-त्री, क्नसयिता-त्री, चिक्नसिषिता-त्री, चाक्नसिता-त्री;

[6]क्नस्यन्-न्ती, क्नसयन्-न्ती, चिक्नसिषन्-न्ती; —

---

1. 'ऋहलोः—' (3-1-124) इति ण्यत्। 'अत उपधायाः' (7-2-116) इति वृद्धिः।
2. 'खरि च' (8-4-55) इति चर्त्वम्।
3. 'ल्यपि लघुपूर्वात्' (6-4-56) इति णेरयादेशः।
4. 'चिण्णमुलोर्दीर्घोऽन्यतरस्याम्' (6-4-93) इति दीर्घविकल्पः।
5. 'जनीजृष्क्नसु—' (गणसूत्रं घटादौ) इति मित्त्वे, 'मितां ह्रस्वः' (6-4-92) इति णौ उपधायाः ह्रस्वः। एवं ण्यन्ते सर्वत्र ज्ञेयम्।
6. 'दिवादिभ्यः श्यन्' (3-1-69) इति श्यन्। 'शप्श्यनोर्नित्यम्' (7-1-81) इति स्त्रियां नित्यम् नुम्।